१ॐ नमः गणेशाय ॥ अथ पूर्णयज्ञोपवीतदानं ॥ कृतनित्यक्रियाचारः उदङ्मुखः॥ दूर्वाक्षतपूगयज्ञोपवीतचन्दनवस्त्रान्यादाय ऊर्द्ध्वाभिमुखो यजमानाय ॐ
अद्यास्मिन्नु कार्य्ये गणेशादि विघ्नविनाशनार्थं स्नानक्रियामिति अद्य अमुकपीतस्य कलीय पितामहस्य यावत् श्रीअमुकदेवीम्॥ इति पठित्वा पूगयज्ञोपवीतादीनि वरयेत्
दद्यात्॥ ॥तत्रावर्त्त॥ ॐ अग्नव स्वाहा अग्नावृधः मनु स्वाहा अग्नावृधः घृतप्रसूता मधुश्च्युतो विराजा नामका मदुघा ऊर्जाय मानः॥ इति मन्त्रेण तदक्षतादि दिक्षु विक्षिप्य
दद्यात्॥ वस्त्रपात्रीधानं यज्ञोपवीतपवीधानञ्च कुर्य्यादिति पूगयज्ञोपवीतदानविधिः॥ ॐ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः॥ ब्राह्मणास्तेन वेदाश्च यज्ञाश्च
विहिताः पुरा॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः॥ प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां॥ ० ॥अथ मातृकापूजाविधिर्लिख्यते॥ तत्र यजमानः स्नातः कृतनित्य
क्रियः कृतोत्थ अन्यतरस्यां भित्तौ वन्दिकायां सदनाय गणपतिदुर्गासहितान् मातृन् गौर्य्यादिषोडशमयी छिदौ नामपि वस्त्रिकायामेव पूजयेत् मातरश्च। गौरी पद्मा शची
मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ हृष्टिः पुष्टिस्तथा तुष्टिस्तथात्मकुलदेवता॥ तत्क्रमः॥ आचम्य॥ प्राणानायम्य उपविश्य॥ कुशत्रययव
जलान्यादाय। ॐ अद्यामुकमासीयामुकतिथौ अमुकगोत्रस्यामुकशर्म्मणोऽमुककर्म्म निमित्तं गणपति दुर्गा श्रीसहितमातृणां पूजनमहं करिष्ये॥ इति संकल्प्य

ग.४

अभिलेखालय
2154 I

कुर्यात्॥ ततो अक्षतामादाय॥ ॐ मनो जूति ईषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनो त्वरिष्टं यज्ञमिमं दधातु॥ विश्वे देवास इह मादयन्तामोमिति अक्षतान्
विकीर्य एकदेवप्रतिष्ठां कुर्यात्॥ ॐ गणपति दुर्गा सहिता गौर्याद्या मातरः सुप्रतिष्ठिता भवन्तिति॥ ततः प्रथमवर्त्तिकामानय ब्रामणं॥ ॐ गणपतिरसि। ॐ दुर्गासि॥ ॐ गौर्यसि।
ॐ पद्मासि। ॐ शच्यसि। ॐ मेधासि॥ ॐ सावित्र्यसि। ॐ विजयासि। ॐ जयासि। ॐ देवसेनासि। ॐ स्वधासि। ॐ स्वाहासि। ॐ मातरः स्थ। ॐ लोकमातरः स्थ॥ ॐ हृष्टिरसि। ॐ पुष्टिरसि॥
श्री॥ ॐ तुष्टिरसि। ॐ आत्मकुलदेवतासि। ॐ श्रीरसि॥ ॥ततो अक्षतमादाय पुनः प्रथमवर्त्तिकामावाह्य ॐ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः दुर्गे इ-
हागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः गौरि इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः पद्मे इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः शचि इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः मेधे इहाग-
च्छ इह तिष्ठ ॐ भूर्भुवः स्वः सावित्रि इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः विजये इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः जये इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः देवसेने इ-
हागच्छ इह तिष्ठ। ॐ भूर्भुवः स्वः स्वधे इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः स्वाहे इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः मातरः इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः लो-

कमातरः इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः हृष्टे इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः पुष्टे इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः तुष्टे इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः आ-
त्मकुलदेवते इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः श्रीः इहागच्छ इह तिष्ठ एवं षोडशकमावाहनं स्थापनं कुर्यात्। ततः पाद्यादिकं गृहीत्वा प्रथमवर्त्तिकामारभ्य ए-
तानि पाद्यार्घाचमनीयस्नानीयपुनराचमनीयानि ॐ गणपतये नमः। ॐ इदमनुलेपनं ॐ गणपतये नमः। ॐ इदमक्षतं गणपतये नमः। पुष्पैः ॐ गणपतये नमः।
इति त्रिः पूजयेत्॥ एवमेव गन्धपुष्पधूपदीपताम्बूलनैवेद्यानि ॐ गणपतये नमः॥ एवमेव॥ ॐ दुर्गायै नमः। ॐ गौर्यै नमः। ॐ पद्मायै नमः। ॐ शच्यै नमः। ॐ मेधायै
नमः। ॐ सावित्र्यै नमः। ॐ विजयायै नमः॥ ॐ जयायै नमः। ॐ देवसेनायै नमः। ॐ स्वधायै नमः। ॐ स्वाहायै नमः। ॐ मातृभ्यो नमः। ॐ लोकमातृभ्यो नमः। ॐ हृष्ट्यै न-
मः। ॐ पुष्ट्यै नमः। ॐ तुष्ट्यै नमः। ॐ आत्मकुलदेवतायै नमः। ॐ श्रियै नमः॥ इति पाद्यादिभिः प्रत्येकमर्च्चयेत्॥ ततः ॐ गणपतिर्दुर्गासहिताः मातरः कामधे-
नुरिति विसर्जयेत्॥ ॐ श्रीप्रसीदन्ति। त्रि यथा वसतिदिति। ततो हि लिलम्प नातिनीचां नातूच्चां। पश्चात् सप्त वा पञ्च वा घृतधारां कुर्यात्। उ हलवा हुनवक्र महा नमके न ॐ

वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ ॐ तिनाथ स्थलन प्रतीकृतम् ॥ ततः आयु
ई द्विकवासि युक्तानि जपन् ॥ ७ ॥ ॐ नमः शिवाय ॥ सन्धिविग्रहमन्त्रीन्द्र देवादित्यनन्दनः । रुमियालशिवायत्ने यज्ञिनां हितम् ॥ स्यानूदः ॥ सन्धिविग्रहकश्रीमद्दीपग्य
वसहादवः ॥ महामहत्तकः श्रीमान् विवाहतिगतवः ॥ श्रीमन्नामदेवन मन्त्रिणा सोऽयं सूनुना ॥ पद्धतिः क्रियते यस्मा अस्यावाजसनेयिनां ॥ ॥ तत्रादौ विवाहः ॥
श्रीः ॥ तत्र कन्यास्कन्धेन वा तत्र हस्तमणुर्यं तद्दक्षिणदिशि पश्चिमाभिमुखं मण्डपमलङ्कृत्य मुहूर्त्ताशिमुखं कौतुकासनं । मण्डपाद्दक्षिणेन । वीजामा गृहस्थं चतुष्टय २
वर्तुलस्यसिकादिपविस्तृता गुल्मकेशगन्धनादि श्रन्यावधूनिर्म्मितवेदिकाश्चकानयन् ॥ ॥ विवाहदिने कन्यानित्यक्रियां गजामातृपितामातृपूजाभ्युदयिककर्म्मं
कन्यापिता च गुर्विष्णुः शुक्लवासाः कृतनित्यक्रियो मातृपूजाभ्युदयिकं कृत्वा । अर्हणवेलायां मण्डपप्रत्यग्द्वारे स्थितं कन्यायास्नेने प्राङ्मुखं वरम्
ईजानं सम्बोध्य ॥ ॐ साधु भवानास्तां मर्च्चयिष्यामो भवन्तमिति ब्रूयात् ॥ ॐ अर्च्चयेति प्रत्युक्ते ॥ वरायवरणार्थं गुद्धमाम नदत्वा ॥ विष्टरमादाय यजमा

२२१२

नः ॥ विष्टरो विष्टरो विष्टरः इति प्रेषणं ॥ ॐ विष्टरः प्रतिगृह्यतां इति वदन् ॥ ॐ विष्टरं प्रतिगृह्णामीत्यभिधाय । ॐ विष्टरं गृहीत्वा ॐ वर्ष्मोऽस्मि समानामुद्यतामिव
सूर्यः ॥ इमन्त्रमसि ति स्थामि यो मा कश्चाभिदासति इत्यनेनासने । उत्तराग्रं विष्टरं पादयोरधस्तादुपविशति ॥ ततः उपविष्टे यजमानः पाद्यमञ्जलिनादाय ॐ पाद्यं पा
द्यं पाद्यमित्यन्यो माके । ॐ पाद्यं प्रतिगृह्यतामिति वदन् । ततो वरः ॐ पाद्यं प्रतिगृह्णामीत्यभिधाय । यजमानाञ्जलिस्थितं अञ्जलिना पाद्यमादाय वरः । ॐ विराजो दो
हासि विराजो दोहमशीय । मयि पाद्यायै विराजो दोहः इति दक्षिणपादं प्रक्षालयति । ततो नन्त्रेण वामपादं प्रक्षालयति । ततः पूर्ववद्विष्टरान्तरं गृहीत्वा चर
णयोरधस्ताद् उत्तराग्रं दद्यात् । ततो दाता स्वस्ति दूर्वाक्षतफलपुष्पचन्दनजलसहितार्घपात्रं गृहीत्वा । अर्घो अर्घो अर्घ इत्यन्यो माके । ॐ अर्घः प्रतिगृह्यता
मिति वदन् । ततो वरः ॐ अर्घं प्रतिगृह्णामीत्यभिधाय यजमानहस्तादर्घं गृहीत्वा ॥ ॐ आपः स्थ युष्माभिः सर्वान् कामानवाप्नवानीति । शिरसि स्थितादिकं क्षिप
दत्वा ॥ ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टास्माकं वीरा मा परासेचि मत्पयः ॥ इत्यर्घपात्रस्थजलमेशान्यां त्यजन् पठति । ततो यजमानः आ

चमनीयमादाय। आचमनीयमाचमनीयमाचमनीयमित्यन्येनोक्ते। ॐ आचमनीयं प्रतिगृह्णामीति वदेत्। ततो वरः ॐ आचमनीयं प्रतिगृह्णामीत्युक्त्वा य
जमानहस्तादाचमनीयमादाय। ॐ आमागन् यशसा सꣳसृज वर्चसा। तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनामित्यनेन सकृदाचामति द्विस्तूष्णीं। ततो
यजमानः कांस्यपात्रस्थदधिमधुघृतानि कांस्यपात्रपिहितान्यादाय मधुपर्को मधुपर्को मधुपर्क इत्यन्येनोक्ते ॐ मधुपर्कं प्रतिगृह्णामीति वदेत्। ततो वरः ॐ म
धुपर्कं प्रतिगृह्णामीत्युक्त्वा। ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे इति यजमानकरस्थमवलोकनं निरीक्ष्य ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृ ३
ह्णामीत्यनेन मधुपर्कं गृहीत्वा वामहस्ते कृत्वा ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि इत्यनामिकया प्रदक्षिणमालोड्यानामिकाङ्गुष्ठाभ्यां
त्रिः भूमौ निःक्षिपेत्। पुनः स्वस्थैव प्रत्येकमङ्गुष्ठानामिकाभ्यां त्रिः प्रक्षिपेत्। ततः ॐ यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यं। तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्ये
न परमो मधव्योऽन्नादोऽसानि इत्यनेन वारत्रयं मधुपर्कं प्राश्नीयात्। तत्रोच्छिष्टं सर्वमेव ततः कृत्वा न तत्र मधुपर्केण वा मधुपर्कं नोदकं वा दद्यात्॥ ॥ततआचम्य॥ ॥
धाव

मङ्गला २ [illegible]

ॐ वाङ्म आस्येऽस्तु ॐ नसोर्मे प्राणोऽस्तु ॐ अक्ष्णोर्मे चक्षुरस्तु ॐ कर्णयोर्मे श्रोत्रमस्तु ॐ बाह्वोर्मे बलमस्तु ॐ ऊर्वोर्मे ओजोऽस्तु ॐ अरिष्टानि मेऽङ्गानि तनूस्त
न्वा मे सह सन्तु। इत्यास्यादिकं सर्वगात्राणि स्पृष्ट्वा। ततो गौर्गौर्गौरिति नापितेनोक्ते। ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्रनुवो
चं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट मम चामुष्य पाप्मा हतः यजमानस्य पाप्मा हतः। ॐ उत्सृजत तृणान्यत्तु इति वदीत्युत्सृजेत्॥ ॥ततो वधूका
यां कुशकण्डिकादि विहितायां हस्तमात्रं चतुरस्रां भूमिं कृत्वा परिसमूह्य तानू कुशान् ऐशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेन वा यागप्र
देशमिते मूलेनोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य तत्र कांस्यपात्रस्थमग्निं प्रत्यङ्मुखमुपसमाधाय तदुत्तरार्थे
कृशिंश्च विनियुज्य कौतुकागाराद्वरः कन्यामानीय मण्डपं पूर्वाभिमुखमुपविश्य तीर्थं पर्यवस्थापयेत्। ॐ जरां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा।
शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः॥ इत्यनेन परिधानवस्त्रं वध्वै दद्यात्॥ ततः ॐ या अकृन्तन्नवय

कून १ वव: २ ॐ स्मि प त्रि ... वत्र क्तस्थे दद्याति

न्या अनन्वत। यास्य देवी कन्नूर्लं लिमातनत्क। नास्लाद र्व्वीजवस सन्नाय स्वायुष्मतीदं पविध स्त्ववासः॥ ॐ निपाठित्वा लवी यचरः। ततः ॐ पत्रिक्षास्थे य (मम) धो स्मे
दीर्घायुत्वाय जवदक्षिनस्मि। ततश्च जीवा मिगतदः पूर्व्वी नायस्याम मक्तिसं पपिथ ॐ निपाठित्वा वरः पविधत्के॥ ॐ यस्सा मायावा पृथिवी यगसेन्द्रा वृकस्य नी
य (मा) रागव मा विदद्य (म) मा प्रतिपद्यतां॥ ॐ निपाठित्वा लनीयं पविदधाति॥ ततो वरस्य कन्या यास्थ हिरा चमनं॥ ततः कन्याप्रदेन ॐ पवस्य वे समम (ङ्) श्वमिति
ध्येषन। कन्यावरयोः परस्परं मक्तिमुखीकरनं॥ ॥ततः ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ। सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ॥ ॐ निवरः प० ४
ति॥ ततो वरवधूलनीयाग्नौ कन्या प्रदक्षिणं वीजनमय ग्रन्थिबन्धनं॥ ॥अथ कन्यादानं॥ दाता गीखम्रदूर्व्वाक्षत फलचन्दनजलान्यादाय जामातृदक्षिणकरोपरि
कन्यादक्षिणकरं विधाय॥ ॐ दाताहं वरुणो राजा द्रव्यमादित्यदैवतं। विधायो विष्णुरूपेण प्रतिगृह्णातु त्वयं विधिः॥ ॐ निपाठित्वा ॐ अद्यामुकमासीयामुकपक्षीया
मुकतिथौ। अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्रपौत्राय। अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः पौत्राय। अमुकगोत्रस्यामुकप्रवरस्यामुक

शर्म्मणः पुत्राय॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्रपौत्रीं। अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः पौत्रीं। अमुकगोत्रस्यामुकप्रवरस्यामुक
शर्म्मणः पुत्रीं॥ एवं वादस्य मूत्रायी [illegible] ममपुत्रीमिति वदन्। अमुकगोत्राया मुकप्रवराया मुकशर्म्मणो ब्राह्मणाय वराय तुभ्यं अमुकगोत्रामुम
कप्रवरामुकदेवीनाम्नीमिमां कन्यां सालङ्कारां वीजाय निदेवतां स्वर्गकामः पत्नीत्वेन अहं संप्रददे॥ ॐ निदद्यात्॥ ॐ स्वस्तीति प्रतिवचनं॥ ततः ॐ द्यौस्त्वा ददा
तु॥ ॐ पृथिवी त्वा प्रतिगृह्णातु॥ ॐ निवरः प०ति॥ ततः कन्याप्रदः पूर्व्ववत् गन्धादिकमादाय कन्यादक्षिणहस्ते वरदक्षिणहस्तोपरि निधाय ॐ अद्य कृ
तैतत्कन्यादानप्रतिष्ठार्थमिमं सुवर्णमग्निदैवतं अमुकगोत्राया मुकप्रवराया मुकशर्म्मणे ब्राह्मणाय वराय दक्षिणां तुभ्यमहं संप्रददे॥ ॐ निदद्यात्॥ ॐ स्व
स्तीति प्रतिवचनं॥ गोमिथुनं वा यथाशक्ति दद्यात्॥ ॐ स्वस्तीति प्रतिवचनं॥ ततः ॐ कोदात् कस्मा अदात् कामोदात् कामायादात्। कामो दाता कामः प्रतिग्र
हीता कामैतत्ते ॐ निवरः प०ठेत्॥ ततः कन्यायाः [illegible]॥ ॐ यदेषि मनसा दूरं दिशोनुपवमानो वा। हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोतु श्री

अमुकदेवि॥ इति वरः प ० ति नि जानाति॥ ततो वधू दक्षिणस्यां दिशि वारिपूर्णकलशं मूर्द्ध्नि निधाय मौनी नरः पूर्वस्य स्थाने अग्नि प्रकयर्य्यन्ते धारयन्नुत
तः पश्चे स्थाने समीपे अथ पिता कन्याप्रदानं कुर्य्यात्॥ ॐ अद्येत्यादि वक्रुवयति प्रभृति नाय गुरवे महमनाः स्वधर्म्मः वीनस्य द्देवि कामाख्या नाम कन्या वद्धि पदर्मीय
तु घट॥ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥ सोमोऽददद्गन्धर्वाय गन्धर्वोऽदददग्नये। रयिं च पुत्रांश्चादाद
ग्निर्मह्यमथो इमाम्॥ ततः पूषा शिवतमामेरय यस्यां मनुष्या वपन्ति या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्यै इति वरः पठेत् ततो
कें पत्न्या वदेत्॥ ततोऽग्निं प्रदक्षिणीकृत्य पश्चादग्नेर्वस्त्रादि वरासनं पूर्वके कटे वा दक्षिणे वरो वधूं दक्षिणतः कृत्वा वरवरयितिनाति। ततः
पुष्पचन्दनताम्बूलवस्त्राण्यादाय ॐ अद्य मम कर्त्तव्य विवाहाङ्गभूत होमकर्म्मणि कृताकृतावेक्षणरूप ब्रह्मकर्म कर्तुं ममुक गोत्र ममुक शर्म्माणं
ब्राह्मणं भवन्तः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे। इति ब्राह्मणं वृणुयात्॥ ॐ वृतोऽस्मीति प्रतिवचनं॥ ॐ यथाविहितं कर्म्म कुरु॥ ॐ ३
मिवस्तोक॥ ॐ करवाणीति प्रतिवचनं। ततो वरः। अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य अग्निं प्रदक्षिणं नानीय ॐ अद्य त्वमब्रह्मा
राव त्वमिहधाय अमुकर्याताम नब्राह्मणमुदङ्मुखमुपवेशयेत्। कुशवटुकरणाय ॐ अद्य मम कर्त्तव्य विवाहाङ्गभूतहोमकर्म्मणि कृताकृतावेक्षणरूप ब्रह्मकर्म कर्तुं
त्वं मम ब्रह्मा भव त्वमिहधाय ब्रह्मा वृणुयात्। ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि नि
दध्यात्॥ ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यन्तं नैरृत्याद्वायव्यान्तं अग्नितः प्रणीतापर्यन्तं। ततोऽग्नेरुत्तरतः पश्चि
मोदिशमारभ्य पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली सम्मार्जनकुशत्रयं उपयमनार्थं वेणीरूपक
शत्रयं समिधस्तिस्रः स्रुवः आज्यं षट्पञ्चाशदुत्तरवरमुष्टिशतद्वयावच्छिन्नतण्डुलैः पूर्णपात्रं सर्वाण्येतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणा
सादनीयानि। अथ तस्यामेव दिशि अन्यानि वरवधू उपकल्पनीयानि॥ तत्र शमीपलाशमिश्रा लाजाः दृषदुपलं कुमारीभ्राता शूर्पं दृढः पुरुषश्च

न्यादपि तद्वयपूर्वकाउँमानयेदिति । ततः पवित्रच्छेदनकुशैः प्रादेशमितं पवित्रं छित्वा सपवित्रदक्षिणकरेण प्रणीतोदकं त्रिः प्रोक्षण्यां निधाय वामानामि
काङ्गुष्ठाभ्यां मूलतः उत्पवित्रं गृहीत्वा त्रिरुत्पवनं । ततः प्रोक्षणीपात्रं वामहस्ते निधाय अनामिकाङ्गुष्ठाभ्यां पवित्रं गृहीत्वा त्रिरुदिङ्गनं ततः प्रणीतोदके
न प्रोक्षणीप्रोक्षणं ततः प्रोक्षणीजलेन यथासादितवस्तुसेचनं । ततोग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रनिधानं । ततः आज्यस्थाल्यामाज्यं निरूप्याधिश्रयणं ॥
ततो ज्वलदुल्मुकादिना हविर्वेष्टयित्वा प्रदक्षिणक्रमेण पर्यग्निकरणं । ततः स्रुवं प्रताप्य सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं सम्मृज्य प्रणीतो ६
दकेनाभ्युक्ष्य पुनस्त्रिः प्रताप्य स्वदक्षिणतः कुशोपरि निदध्यात् । ततः आज्यस्याग्रेरवतारणं । ततः आज्ये प्रोक्षणीवदुत्पवनं । अथ आज्ये सत्यपद्रव्ये तन्नि श्रिवः ६
रसनं ततः पूर्ववत् प्रोक्षण्युत्पवनं । तत उपयमनकुशान् वामहस्ते कृत्वा उत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः प्रक्षिप
न् ॥ तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रं निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः स

मिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहुयात् । तत्राघारादारभ्य द्वादशाहुतिषु । तत्राहुत्यनन्तरं स्रुवावस्थितहुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः । ॐ प्रजापतये स्वाहा ॥
इदं प्रजापतये न मम ॥ इति मनसा । ॐ इन्द्राय स्वाहा । इदमिन्द्राय । इत्याघारौ । अथाग्नेर्दक्षिणभागे । ॐ अग्नये स्वाहा ॥ इदमग्नये । ॐ सोमाय स्वाहा ॥ इदं
सोमाय । इत्याज्यभागौ । ॐ भूः स्वाहा । इदमग्नये । ॐ भुवः स्वाहा । इदं वायवे । ॐ स्वः स्वाहा । इदं सूर्याय । एता महाव्याहृतयः ॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो
अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ॐ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि । अया नो यज्ञं वहास्यया नो धेहि भेष
जं स्वाहा ॥ इदमग्नये ॥ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः । ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथा वयमादित्य व्रते तवानागसो

मू३ अ१ म२

शुदितय स्याम स्वाहा॥ इदं वरुणाय अग्नये सर्व्वायायधिलसंक्रुकाः। मना भुवानऽइन्द्रऽस्य घाताच्छ पञ्चविनेव॥ ॐ ऋताषाडृतधामाग्निर्ग्गन्धर्व्वः स नः इ-
दं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ इदमृताषाहे ऋतधाम्ने अग्नये गन्धर्व्वाय। ॐ ऋताषाडृतधामाग्निर्ग्गन्धर्व्वस्तस्यौषधयो ऽप्सरसो मुदो नाम ताभ्यः स्वाहा॥ इद-
मोषधिभ्यो ऽप्सरोभ्यो मुद्भ्यः॥ ॐ संहितो विश्वसामा सूर्यो गन्धर्व्वः स नः इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ इदं संहिताय विश्वसाम्ने सूर्याय गन्धर्व्वाय॥ ॐ
संहितो विश्वसामा सूर्यो गन्धर्व्वस्तस्य मरीचयो ऽप्सरसऽआयुवो नाम ताभ्यः स्वाहा॥ इदं मरीचिभ्यो ऽप्सरोभ्यऽआयुभ्यः॥ ॐ सुषुम्णः सूर्य्यरश्मिश्चन्द्रमा गन्ध- १
र्व्वः स नः इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्व्वाय। ॐ सुषुम्णः सूर्य्यरश्मिश्चन्द्रमा गन्धर्व्वस्तस्य नक्षत्राण्यप्सरसो
भेकुरयो नाम ताभ्यः स्वाहा॥ इदं नक्षत्रेभ्यो ऽप्सरोभ्यो भेकुरिभ्यः॥ ॐ इषिरो विश्वव्यचा वातो गन्धर्व्वः स नः इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ इदमिषिरा-
य विश्वव्यचसे वाताय गन्धर्व्वाय॥ ॐ इषिरो विश्वव्यचा वातो गन्धर्व्वस्तस्यापो ऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा॥ इदमद्भ्यो ऽप्सरोभ्य ऊर्ग्भ्यः॥ ॐ भुज्युः सुपर-

र्ण्णो यज्ञो गन्धर्व्वः स नः इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ इदं भुज्यवे सुपर्ण्णाय यज्ञाय गन्धर्व्वाय॥ ॐ भुज्युः सुपर्ण्णो यज्ञो गन्धर्व्वस्तस्य दक्षिणा अप्सरसः स्तावा ना-
म ताभ्यः स्वाहा॥ इदं दक्षिणाभ्यो ऽप्सरोभ्यः स्तावाभ्यः॥ ॐ प्रजापतिर्विश्वकर्म्मा मनो गन्धर्व्वः स नः इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ इदं प्रजापतये विश्वकर्म्मणे मनसे
गन्धर्व्वाय॥ ॐ प्रजापतिर्विश्वकर्म्मा मनो गन्धर्व्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा वाट्॥ इदम् ऋक्सामभ्यो ऽप्सरोभ्य एष्टिभ्यः॥ इति गन्धर्व्वहोमः॥ ॐ चित्तं च
स्वाहा॥ इदं चित्ताय। ॐ चित्तिश्च स्वाहा॥ इदं चित्त्यै। ॐ आकूतं च स्वाहा॥ इदमाकूताय॥ ॐ आकूतिश्च स्वाहा॥ इदमाकूत्यै॥ ॐ विज्ञातं च स्वाहा॥ इदं विज्ञाताय॥
ॐ विज्ञानं च स्वाहा॥ इदं विज्ञानाय॥ ॐ मनश्च स्वाहा॥ इदं मनसे॥ ॐ शक्वरीश्च स्वाहा॥ इदं शक्वरीभ्यः॥ ॐ दर्शश्च स्वाहा॥ इदं दर्शाय॥ ॐ पौर्ण्णमासं च स्वाहा॥ इदं पौर्ण्णमा-
साय॥ ॐ बृहच्च स्वाहा॥ इदं बृहते॥ ॐ रथन्तरं च स्वाहा॥ इदं रथन्तराय॥ ॥ ॐ प्रजापतिर्ज्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु। तस्मै विशः समनमन्त स-
र्व्वाः सऽउग्रः स इ हव्यो बभूव स्वाहा॥ इदं प्रजापतये जयानिन्द्राय॥ ॥ इति जयाहोमः॥ ॐ अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशि-

॰ इदं वनस्पतन क्षत्राणामधिपतये ॥ ॐ बृहस्पतिर्ब्रह्मण्याधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इ
घस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदमग्नये ॥ तानामधिपतये ॥ ॐ इन्द्रो ज्येष्ठानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामा
शिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदमिन्द्राय ज्येष्ठानामधिपतये ॥ ॐ यमः पृथिव्या अधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्या
माशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं यमाय पृथिव्या अधिपतये ॥ अत्र प्रणीतोदकस्पर्शः ॥ ॐ वायुरन्तरिक्षस्याधिपतिः समाव
त्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं वायवेऽन्तरिक्षस्याधिपतये ॥ ॐ सूर्यो दिवोऽधिपतिः समा ८
वत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं सूर्याय दिवोऽधिपतये ॥ अत्र प्रणीतोदकस्पर्शः ॥ ॥ ॐ
चन्द्रमा नक्षत्राणामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं बृहस्पतये ब्रह्मणा
धिपतये ॥ ॐ मित्रः सत्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं मित्राय

सत्यानामधिपतये ॥ ॐ वरुणोऽपामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं वरुणायापा
मधिपतये ॥ ॐ समुद्रः स्रोत्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं समुद्राय स्रो
त्यानामधिपतये ॥ ॐ अन्नं साम्राज्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदमन्नाय सा
म्राज्यानामधिपतये ॥ ॐ सोम ओषधीनामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं सोमायौ
षधीनामधिपतये ॥ ॐ सविता प्रसवानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं सवित्रे प्रस
वानामधिपतये ॥ ॐ रुद्रः पशूनामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदं रुद्राय प
शूनामधिपतये ॥ अत्र प्रणीतोदकस्पर्शः ॥ ॐ त्वष्टा रूपाणामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वा

२४

हा॥ ॐ इदं वरुणायापामधिपतये॥ ॐ विष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मन्यस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्यस्यां देवहूत्यां स्वाहा॥ ॥
ॐ इदं विष्णवे पर्वतानामधिपतये॥ ॐ मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन् ब्रह्मन्यस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्यस्यां देवहूत्यां स्वाहा॥ ॐ इदं
मरुद्भ्यो गणानामधिपतिभ्यः॥ ॐ पितरः पितामहाः परेवरे ततास्ततामहाः। इह मावन्त्वस्मिन् ब्रह्मन्यस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्यस्यां
देवहूत्यां स्वाहा॥ ॐ इदं पितृभ्यः पितामहेभ्यः परेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यः॥ अत्र पुनीतादकस्पर्शः॥ इत्यस्य नानाम होमः॥ ॐ अग्निरैतु प्रथमो देवाना ९
॰ सोस्यै प्रजां मुञ्चतु मृत्युपाशात्। तदयं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् स्वाहा॥ ॐ इदमग्नये॥ ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यैन
यतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभि विबुध्यतामियं स्वाहा॥ ॐ इदमग्नये गार्हपत्याय॥ ॐ स्वस्ति नो अग्ने दिव आ पृथिव्या विश्वानि धेह्यय नि॰धे॰६
था यजत्र यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा॥ ॐ इदमग्नये॥ ॐ सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मद्धेह्यजरन्न आयुः। अपैतु
मृत्युरमृतं न आगाद् वैवस्वतो नो अभयं कृणोतु स्वाहा॥ ॐ इदं वैवस्वताय॥ अत्र पुनीतादकस्पर्शः॥ पत्नक्ष्णि॥ ॐ परं मृत्यो अनु परेहि पन्थां यस्ते अन्य
यथा १

ठ४ क१

इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् स्वाहा॥ ॐ इदं मृत्यवे॥ अत्र पुनीतादकस्पर्शः॥ ॥ ततो वधूमग्रतः कृत्वा वधूवरौ
प्राङ्मुखौ तिष्ठतः॥ ततो वधूः अञ्जलिं पूरयति। संलग्नवधूअञ्जलिस्थ घावित वधूयादद् शमीपलाशमिश्रलाजैर्वधूकर्तृका मन्त्रया॰ पूर्वकाहोमः॥
ॐ अर्यमणं देवं कन्या अग्निमयक्षत। स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा॥ ॐ इदमर्यम्णे॥ ॐ इयं नार्युपब्रूते लाजानावपन्तिका। आयुष्मानस्तु मे प
तिरेधन्तां ज्ञातयो मम स्वाहा॥ ॐ इदमग्नये॥ ॐ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव। मम तुभ्यं च संवननं तदग्निरनुमन्यतामियं॰ स्वाहा॥ ॐ इदमग्नये॥
ततो वरो वधूदक्षिणहस्तं साङ्गुष्ठं मूलेन गृह्णाति॥ ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्ह
पत्याय देवाः॥ अमोहमस्मि सा त्वं॰ सा त्वमस्यमो अहं। सामाहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वं ताविह संवहावहै। सह रेतो दधावहै प्रजां प्रजनयावहै। पु
त्रान् विन्द्यावहै बहून्॥ ते सन्तु जरदष्टयः। संप्रियौ रोचिष्णू सुमनस्यमानौ। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमि
श्री २

य३

तिमन्त्रः। अथ वधूमग्नेरुत्तरतः प्राङ्मुखीं पूर्वकल्पितदृषदुपलं दक्षिणपादेनारोहयति वरः॥ ॐ आरोहेममश्मानमश्मेव त्वं स्थिरा भव।
अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः॥ इति मन्त्रेण। आज्यदायामवरस्यां वरो गाथां गायति॥ ॐ सरस्वति प्रेदमव सुभगे वाजिनीवति।
। यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः। यस्यां भूतं समभवद्यस्यां विश्वमिदं जगत्। तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः॥ इति। ततः
प्रवर्त्य पश्चाद्वरः प्रणीताग्न्योः सहितमग्निं प्रदक्षिणीकुर्वतः॥ ॐ तुभ्यमग्ने पर्यवहन्सूर्यां वहतुना सह। पुनः पतिभ्यो जायां दा अग्ने प्रजया सह॥ १०
इति वरः पठति। ततः पश्चादग्नेः पूर्ववत्स्थित्वा लाजहोमसाङ्गुष्ठहस्तग्रहणाश्मारोहणगाथागानाग्निप्रदक्षिणं निवर्तयति। पुनः पठति तथैव॥ पुनस्तेन
वै तेन लाजा ज्ञातयः। साङ्गुष्ठहस्तग्रहणत्रयमश्मारोहणत्रयं गाथागानत्रयमग्निप्रदक्षिणत्रयं च संवर्धयेत्। ततः शिष्टलाजैः कन्याभ्राता वधूदत्तेन
अञ्जलिस्थ शूर्पकोणेन वधूर्जुहोति ॐ भगाय स्वाहा। इदं भगाय इति मन्त्रेण॥ ततश्च तुः प्रक्रमणं कुर्मीमव॥ ॥ततो वरवध्वोरुपविश्य वृक्षपात्राद्वद्धा

लं पूर्वे

त्रेन जुहोति॥ ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये इति मनसा। अथ प्राक्पश्चाद्यायुः कृत्वा सम्प्रक्रमयेत्। ततः अग्नेः उत्तरतो लत्रमम् ... कृत्वा सप्त
मण्डलेषु सप्तपदाक्रमणं वधूं वरः कारयति वक्ष्यमाणमन्त्रैः। ततः प्रथमे ॐ एकमिषे विष्णुस्त्वां नयतु। द्वितीये ॐ द्वे ऊर्जे विष्णुस्त्वां नयतु। तृतीये ॐ
त्रीणि रायस्पोषाय विष्णुस्त्वां नयतु। चतुर्थे ॐ चत्वारि मायोभवाय विष्णुस्त्वां नयतु। पञ्चमे ॐ पञ्च पशुभ्यो विष्णुस्त्वां नयतु। षष्ठे ॐ षडृतुभ्यो विष्णुस्त्वां नय
तु॥ सप्तमे सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वां नयतु। ततोऽग्नेः पश्चादुपविश्य पूर्वं स्कन्धे स्थितकुम्भादाम्रपल्लवेन जलमानीय तेन
जलेन वरो वधूमूर्द्धनि अभिषिञ्चति॥ ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमाः। ततः सूर्यं ... अञ्जलिजलेन ... एवं कुम्भात्तथैव जलमा
नीय समानमभिषिञ्चति॥ ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे। ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।
ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः। इति त्रिभिर्ऋग्भिः। ततः ॐ सूर्यमुदीक्षस्वेति। वधूः सवितारं पश्यति॥ ॐ तच्चक्षुर्देव

स्र

क.ल कुलके ... ०
कुलपञ्जी

हिरण्यपूर्वस्यां कृत्तमूर्ध्वनम् । पश्यमग्नवदःग्नतीं ध्रुवमग्नवदःग्नतीं ध्रुवमग्नवदःग्नतीं ध्रुवामग्नवदःग्नतीं मदीनास्यामग्नवदःग्नतीं सूयश्च ग्नवदः
ग्नताम् ॥ ॐ तिपश्चिवावधूः सूर्यं पश्यति । अभिहितं वधूं ॐ ध्रुवमसीकास्वति पतिमनक्तवं ध्रुवं पश्यति । तत्रवनय० नीयामन्त्रः ॥ ॐ ध्रुवमसि ध्रुवं
त्वा पश्यामि ध्रुवैधि पोष्या मयि मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती संजीव शरदः शतमिति ॥ ॥ यद्यसौ यदि न पश्यति । तथापि पश्यामीति ब्रू
यात् ॥ ततो वरो वधूं दक्षिणांसे स्वापयित्वा हस्तेन नीत्वा हृदयमालभते । ॐ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु । मम वाचमेकमना जुषस्व
प्रजापतिष्ट्वा नियुनक्तु मह्यम् ॥ इति मन्त्रेण ॥ ॥ अथ वधूमभिमन्त्रयेत् ॥ ॐ सुमङ्गलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्वा याथास्तं विपरेतन ।
इति मन्त्रेण ॥ ॥ अथ वधूं बलवान् कश्चिद्ब्राह्मण उत्थाय प्रागुदग्भ्यनुगुप्तागारे लोहितानडुहचर्मणि उपविशामास्ते उपवेशयेत् ॥ वधांव ॥ ॐ इह
गावो निषीदन्त्विहाश्वा इह पूरुषाः । इह सहस्रदक्षिणो यज्ञ इह पूषा निषीदतु ॥ इति मन्त्रेण ॥ ॥ अथ स्विष्टकृद्धोमः ॥ ॐ अग्नये स्विष्टकृते ११

स्वाहा । इदमग्नये स्विष्टकृते न मम । स्रुवाहिह्नाहुतौ शेषं तत्स्य प्राशनीयार्थं प्रक्षिपेत् ॥ अथ यथा हामन्त्रज्ञ [illegible] कर्मकः ॥ ततः आचम्य । संस्रवप्राशनम् ॥
ततश्चाचम्य ॥ ॐ अद्य कर्तेन द्विवाहहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्राय अमुकशर्मणे ब्रा
ह्मणाय ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे ॥ इति ब्रह्मणे दक्षिणां दद्यात् । ॐ स्वस्तीति प्रतिवचनं ॥ ततो ब्रह्मग्रन्थिमोचनं । कुशवटुकापञ्च । एऽग्निमार्जनी । ततः
प्रणीताविमोकः ॥ ॐ सुमित्रिया न आप ओषधयः सन्तु इति पवित्रं गृहीत्वा प्रणीताजलेन शिरःसंमार्जः । ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि य
ञ्च वयं द्विष्मः ॥ इति ऐशान्यां प्रणीतान्युब्जीकुर्यात् ॥ ॥ ततस्तरणक्रमेण बर्हिरानीयाज्येनाभिघार्य हस्तेनैव जुहुयात् । ॐ देवा गातुविदो गातुं वि
त्त्वा गातुमित । मनसस्पत इमं देवयज्ञं स्वाहा वाते धाः स्वाहा ॥ इति मन्त्रेण ॥ ततोऽञ्जलिं यवधान्यं दक्षिणहस्तेन ध्रुवस्य [illegible] पूर्णाहुतिं ववषकुर्या
त् ॥ तन्मन्त्रः ॥ ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा ॥ ॥
मि.थि

ततः ग्रुवनरस्मानीयानामिका गृहीत्वा तस्मात् ॐ त्र्यायुषं जमदग्नेः इति ललाटे ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायां ॐ यद्देवानां त्र्यायुषमिति दक्षिणबा
हुमूले ॥ ॐ तन्नोऽस्तु त्र्यायुषमिति हृदि । इति प्रत्येकं विन्दुत्रयं त्र्यायुषं कुर्यात् । अनेन क्रमेण वध्वा अपि । ततो गन्धो इत्यस्य स्थाने तत इति विशेषः ।
ॐ अद्य कृतैतद्विवाहकर्मप्रतिष्ठार्थं आचार्याय पूजदेवशर्मा यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे ॥ ॥इति कर्म दक्षिणा ॥ ॥ततः आचार्यो वरेण १२
गृहीत्वा मीसुवर्णप्रतिते सिन्दूरकरण्डे वरकरेण ॥ ततो वरपितृप्रतिष्ठितश्रीपूर्ववंशः सिन्दूरकरण्डं ग्राम्यवचनेन वध्वा कुर्यात् ॥ अस्याः स्त्रियः ॥ ॥
अथर्ववेदिना मन्त्रपमानस्य दूर्वाक्षता दिग्रहन्ती ॥ ततः स्त्रियो मन्त्रेण जलेन नालिनावरवधू गन्धमाल्यादिना निराजनं थूनो वरवधूवर्णेऽस्य ॥ इति विवा
हः ॥ ५ ॥

आशा सफूकुथि ASHA ARCHIVES 2154 I